14-07-2020

अनिवार्यपत्रम् । शास्त्री II

व्याकरण के छात्र हेतु (साहित्यम्) । रघुवंशम् । श्लोकव्याख्या ।

" परार्घ्यवर्णास्तरणोपपन्नमासेदिवान् रत्नवदासनं सः ।
भूयिष्ठमासीदुपमेयकान्तिर्मयूरपृष्ठाश्रयिणा गुहेन ॥ "

प्रस्तुतोऽयं श्लोकः महाकविकालिदासविरचितस्य रघुवंशमहाकाव्याद् षष्ठसर्गात् इन्दुमतीस्वयम्वरवर्णनादुद्गृहीतोऽस्ति ।

आसने उपविष्टः अजः मयूरपृष्ठे पक्षीविशेषे आसीनः स्वामिकार्तिकेयसदृशः प्रतिभाति ।

अन्वयः → परार्घ्यवर्णास्तरणोपपन्नं रत्नवद् आसनम् आसेदिवान् स मयूरपृष्ठाश्रयिणा गुहेन भूयिष्ठम् उपमेयकान्तिः आसीत् ।

शब्दार्थः व्याकरणञ्च → परार्घ्यवर्णाः + आस्तरणम् + उपपन्नम् = परार्घ्याः वर्णाः यस्य तत् परार्घ्यवर्णः, तच्च आस्तरणम्, तेन च उपपन्नम्, तत् परार्घ्यवर्णास्तरणोपपन्नम् = श्रेष्ठनीलपीतादिवर्णवस्त्रसङ्गतं । रत्नवत् = माणिक्यादिरत्नजटितम् । आसनम् = विष्टरम् । आसेदिवान् = उपविष्टान् । सः = अजः । मयूरपृष्ठाश्रयिणा = बर्हिपृष्ठोपविष्टेन (मयूरस्य पृष्ठम् आश्रयति इति मयूरपृष्ठाश्रयी, तेन) । गुहेन = कार्तिकेयेन । भूयिष्ठम् = अत्यर्थम्, अधिकम् । उपमेयकान्तिः = शोभोपमेयः आसीत् = बभूव ।

अस्मिन् श्लोके शृङ्गाररसः, वैदर्भीरीतिः, माधुर्यगुणः, उपमालङ्कारः, उपजातिवृतञ्च ।

(signature) 14-07-2020

डॉ० निर्मल कुमार झा, (स० प्राचार्य)
राधा-उमाकान्त संस्कृत महावि० सुखसेना, पूर्णियाँ

14-07-2020

संस्कृतसामान्यम् । उपशास्त्री I

अनिवार्यपत्रम् । तत्पुरुषः समासः ।

1. द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः → द्वितीयान्तं श्रितादिप्रकृतिकैः सुबन्तैः सह वा समस्यते, स तत्पुरुषः ।

द्वितीयान्त सुबन्त पद का श्रित, अतीत, पतित, गत, अत्यस्त, प्राप्त तथा आपन्न पद के साथ विकल्प से समास हो तथा इसकी तत्पुरुष संज्ञा हो ।

सूत्रस्थ द्वितीया शब्द से द्वितीयान्त पद का ग्रहण हो । 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' इस परिभाषा से श्रिता, अतीता, पतिता आदि स्त्रीलिङ्गवाची सुबन्तों के साथ भी द्वितीयान्त पद का समास विकल्प से हो । यथा → कृष्णं श्रितः = कृष्णश्रितः । कृष्णं श्रिता = कृष्णश्रिता । दुःखातीतः, दुःखातीता, कूपपतितः, कूपपतिता, अस्तगतः, ग्रामप्राप्तः, धनापन्नः, ग्रामात्यस्तः ।

रूपसिद्धिः

दुःखातीतः → लौ० वि० – दुःखम् अतीतः । अ० वि० – दुःख अम् अतीत सु । अत्र द्वितीया श्रितातीत०--- सूत्रेण द्वितीयान्तं दुःखम् पदस्य अतीत पदेन सह तत्पुरुषः समासः । प्रातिपदिक संज्ञा, सुप् लोप → दुख अतीत । उपसर्जन संज्ञा, पूर्वप्रयोगः । स्वौजसमौट्० सूत्रेण प्रथमा, एकवचने – सु दुख अतीत सु । अकः सवर्णे दीर्घः → दुखातीत सु । रुत्वविसर्गौ भूत्वा दुःखातीतः ।

14-07-2020

डॉ० निर्मल कुमार झा (स० प्राचार्य)
रा० उ० सं महावि० सुखसेना, पूर्णियाँ ।

14-07-2020

साहित्यम्        शास्त्री I

# शिशुपालवधम्।        श्लोकव्याख्या।

"विराद्ध एवं भवता विराद्धा बहुधा च नः।
निर्वर्त्यतेऽरिः क्रियया स श्रुतश्रवसः सुतः॥"

श्लोकोऽयं महाकविश्रीमाघप्रणीतस्य शिशुपालवध-महाकाव्यस्य द्वितीयसर्गादुद्धृतमस्ति। अत्र बलरामः शिशुपालं कृत्रिमं शत्रुं कथयति। स कथयति यत् हे कृष्ण! एवम् भवता यो विप्रकृतः तथा च यः अस्माकं बहुधा विरोधकर्ता वर्तते, सः श्रुतश्रवसः पुत्रः शिशुपालः अपमान-रूपेण कार्येण कृत्रिमः शत्रुः क्रियते।

अन्वयः → एवं, भवता विराद्धः बहुधा नः च विराद्धः। श्रुतश्रवसः सुतः सः क्रियया अरिः निर्वर्त्यते।

शब्दार्थः व्याकरणञ्च → एवम् = इत्थम्, पूर्वोक्तप्रकारेण। भवता = त्वया। विराद्धः = विप्रकृतः। बहुधा = बहुप्रकारेण। नः = अस्माकं। श्रुतश्रवसः = श्रीकृष्णस्य पितृष्वसा तस्याः। क्रियया = कार्येण, अरिः = कृत्रिमः शत्रुः। निर्वर्त्यते = क्रियते। विराद्धः - विराध्यते स्म। विराध्यतीति विराद्धा। अरिः = शत्रुः, √ऋ + इन। विराद्ध → वि + √राध् + क्त, विरोधः। बहुधा = (अव्ययमस्ति) - बहु + धाच्, विविधप्रकारेण। सुतः - सु + क्त, आत्मजः, पुत्रः।
अस्मिन् श्लोके अनुष्टुप् छन्दः।

[signature] 14-07-2020

डॉ० निर्मल कुमार झा, (स० प्राचार्य)।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ।

14-07-2020

संस्कृतसामान्यम् । उपशास्त्री II

अनिवार्यपत्रम् । बहुव्रीहिः समासः ।

1. शेषो बहुव्रीहिः → अधिकारोऽयम् । प्राग्द्वन्द्वात् ।
यह अधिकार सूत्र है। शेषो बहुव्रीहिः से लेकर चार्थे द्वन्द्वः सूत्र के पूर्व तक जो समास कार्य हो, वह बहुव्रीहि संज्ञक हो। शेषः का अर्थ है पूर्वागत समास अव्ययीभाव तथा तत्पुरुष को छोड़कर। शेष का दूसरा भी अर्थ है तत्पुरुष समास में द्वितीयान्त पद से लेकर सप्तम्यन्त पद का समर्थ सुबन्त के साथ समास हो चुकने पर अवशिष्ट प्रथमान्त पद। यानि शेष से तात्पर्य हुआ प्रथमा विभक्ति, जिसका समासशास्त्र में नाम नहीं लिया गया है। अतएव प्रथमान्त पद का समास बहुव्रीहि हो।

→ अन्यपदप्रधानो बहुव्रीहिः →
बहुव्रीहि समास में विग्रहावस्था में तीन पद होते हैं। यहाँ अन्य पद की प्रधानता होती है।
यथा→ प्राप्तोदकः → प्राप्तम् उदकं यम् (सः)।

2. अनेकमन्यपदार्थे → अनेकं प्रथमान्तम् अन्यपदार्थे वर्तमानं वा समस्यते स बहुव्रीहिः।
अन्य पद के अर्थ में वर्तमान अनेक प्रथमान्त पदों का विकल्प (वा) से जो समास, वह बहुव्रीहि संज्ञक हो। बहुव्रीहि समास प्रथमा विभक्ति के अर्थ में न होकर समानाधिकरण हो।

14-07-2020

डॉ० निर्मल कुमार झा, (स० प्राचार्य)।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ।